॥ गुरुगुणस्तवनम् ॥

उन्मीलन्नीलनीरेरुहनिवहमहः पुष्टिमुष्टिन्धयिश्रीः
श्रीभूदुर्गादृगन्तप्रचयपरिचयोदारकिर्मीरभावः ।
स्वैरक्षीरोदनिर्यच्छशिरुचिनिचयाखर्वगर्वापनोदी
पातु श्रीनेतुरस्मान्सपदि बुधजनत्राणदक्षः कटाक्षः ॥ १ ॥

मातस्त्वामुपकल्पिताऽखिलजगत्सर्गेऽजभर्गेऽडिते
चेतो न प्रजहातु जातुचिदिह स्वर्गेऽपवर्गेऽपि नः ।
लावण्यादधरीकृतामरवधूवर्गे निसर्गेहितं
कारुण्यं कुरु मा कृथा मयि पुनर्दुर्गे विसर्गे मतिम् ॥ २ ॥

श्रीमद्रामाभिरामामितमहिमपदप्रौढपाथोरुहालिः
कृष्णानिष्टामितक्ष्मापरिवृढपटलीपाटनैकप्रवीणः ।
वेदव्यासोपदेशाधिकसमधिगतानन्तवेदान्तभावो
भूयात्कीशावनीशव्रततनुरनिलः श्रेयसे भूयसे नः ॥ ३ ॥

उद्वेलव्यासतन्त्रव्यवसितनिखिलाभिज्ञहृद्यानवद्या-
नन्तत्रय्यन्तभावप्रकटनघटनासर्वतन्त्रस्वतन्त्रे ।
संवर्ण्ये मन्त्रवर्णैरनितरविषयस्पर्शिभिः पावमाने
रूपे लोकैकदीपे प्रसरतु हृदयं मामकं मध्वनाम्नि ॥ ४ ॥

विज्ञानोदर्कतर्कप्रतिपदमधुरोदारसन्दर्भगर्भ-
प्रौढानेकप्रबन्धप्रकटितभगवत्पादभाष्यादिभावः ।
मिथ्यावादापवादप्रकुपितविमतध्वान्तसन्तानभानु-
र्जीयादन्यैरजेयस्त्रिभुवनविदितार्श्वयचर्यो जयार्यः ॥ ५ ॥

श्रीमत्पूर्णप्रबोधप्रकटितपदवीधाविमेधाविधीमत्-
सेनानासीरसीमासमुदितविदिताबाधयोधाधिनेता ।
मायासिद्धान्तदीक्षाविघटनघटनासर्वतन्त्रस्वतन्त्रः

श्रीरामव्यासदासो विलसति विबुधेन्द्राभिधः संयमीन्द्रः ॥ ६ ॥

मायातन्त्रामरारिस्मयमपनयतो मध्वसिद्धान्तनाम्नो
नेत्राणीव त्रयोऽपि त्रिजगति नृहरेरिन्धते यत्प्रबन्धाः ।
यद्वागद्वैतविद्याचलकुलकुलिशप्रौढिमाढौकते सः
श्रेयो भूयो विदध्यात्सुमहितमहिमा सम्प्रतिव्यासराजः ॥ ७ ॥

चातुर्यैकाकृतिर्यश्चतुरधिकशतग्रन्थरत्नप्रणेता
धूतारातिप्रबन्धः स्फुटविदितचतुः षष्टिविद्याविशेषः ।
सोऽयं नः श्रीसुरेन्द्रव्रतिवरतनयोऽद्वैतशैवासहिष्णुः
पुष्णातु श्रीजयीन्द्रस्त्रिभुवनविदितः सर्वतन्त्रस्वतन्त्रः ॥ ८ ॥

व्याधूतावद्यहृद्यामितकृतिरचनाचारुचातुर्यहृष्यत्-
कर्णाटक्षोणिपालप्रतिपदरचितानेकरत्नाभिषेकः ।
पत्रीशारूढलक्ष्मीपतिपदनलिनोदग्ररोलम्बलीलो
विख्यातः श्रीसुधीन्द्रव्रतिपतिरतुलं भद्रमुन्निद्रयेन्नः ॥ ९ ॥

धूतावद्यैरविध्याविघटनपटुभिर्विद्वदभ्यर्थनीयै-
र्वाचः प्राचां प्रवाचामुपचयमभजन् यत्कृतग्रन्थजालैः ।
सङ्ख्यावन्तो यमाहुर्मुहुरखिलकलामूर्तिमुद्वृत्तकीर्ति-
र्धीरः श्रीराघवेन्द्रः स दिशतु सततं भव्यमव्याहतं नः ॥ १० ॥

ये रामव्यासपादप्रणिहितमनसो मध्वतन्त्रप्रतिष्ठा-
धुर्यामर्यादबोधाः फणिपतिमणिविप्रौढिकेलिप्रतोल्यः ।
मीमांसातर्कजन्मक्षितिरथकवितारीतिवर्त्मप्रतीत-
प्रागल्भ्यांस्तानुपेन्द्रव्रतिविबुधमणीन्देशिकानाश्रयेऽहम् ॥ ११ ॥ [1]

योगो यः कर्मनामा कविभिरभिहितो यश्च विज्ञानसञ्ज्ञः
शक्तो नासिद्धकायस्तनुमतिरनयोस्तावदावर्जनेऽहम् ।
यश्चोपायैरुपेयः स्थिरफलविधये देशिकस्य प्रसादः
तस्मै तस्य स्तुवीयाऽनिशमपि चरितं राघवेन्द्रव्रतीन्दोः ॥ १२ ॥

एष श्रीराघवेन्द्रव्रतिवरचरिताम्भोनिधिः क्रातिवेलः

---

[1] ये रामव्यासपार्प्रविहितमनसो मध्वरन्त्रप्रतिष्ठा
धुर्यादसंवित्सुमहितसुमतीन्द्रार्यशिष्याग्रगण्याः ।
नित्यत्रय्यन्तचिन्तापरिणतविशदाशेषतत्त्वावबोध
प्रख्यातान्तानुपेन्द्रव्रतिविबुधमणीन्देशिकानाश्रयेऽहम् ॥ ११ ॥

क्वासौ खद्योतपोतप्रमुषितविभवश्चेतसो नः प्रकाशः ।
वन्ध्यैवातः प्रतिज्ञातदतुलनिखिलाश्चर्यचर्याभिधाने
स्थानेऽथापि क्वचित् स्यादिहपुनरुदधिस्नानसङ्कल्पवत्स्यात् ॥ १३ ॥

यज्ञानौ यत्कृशानौ यदमृतकिरणे यद्गृहेषूदितेषु
ज्योतिर्यत्तारकासु प्रथितमणिषु यद्यच्च सौदामिनीषु ।
सम्भूयैतत्समस्तं त्वदमितहृदयाकाशनिर्यत्प्रकाशे
धीर श्रीराघवेन्द्रव्रतिवर भजते हन्त खद्योतरीतिम् ॥ १४ ॥

चित्तेनायुक्तमर्थं कलयति सहसा नाभिधत्ते न सद्भिः-
साकं मीमांसते वा न लिखति वचसोद्घाटयत्याशयं स्वम् ।
उक्तं नो वक्ति भूयः क्वचिदपि लिखितं नैव निर्मार्ष्टि तस्मा-
दस्माभिः सत्प्रबन्धप्रणयनविषये स्तूयते राघवेन्द्रः ॥ १५ ॥

धीरश्रीराघवेन्द्रं कृतनिजविजयस्रग्धरार्थप्रकाशं
दृष्ट्वा सन्तुष्टचेताः दशमतिरचिरादभ्यषिञ्चत्पदे स्वे ।
नूनं वाणी तदीयाननननलिनगता तत्कृतस्वप्रियैक-
प्रत्यासङ्गप्रहृष्टा स्वयमपि तदनु स्वे पदे चाभ्यषिञ्चत् ॥ १६ ॥

ग्रन्थो वादावली द्रागभजत विदितो दुर्मतारण्यदाहात्
आपूर्वार्धप्रतीपक्रमपरिपठितस्वाभिधागोचरत्वम् ।
तस्य श्रीराघवेन्द्रव्रतिवर भवतो वायुवंशप्रसूते-
रेतर्ह्युद्दीपनं यत्तदुचितमिति मे मानसी वृत्तिरिन्ध॥ १७ ॥

वन्दारुप्राणिचेतः श्रिततिमिरपरीभावपाण्डित्यभाज-
स्तेजस्ते राघवेन्द्रव्रतिवर किमिति श्रीमतो वर्णयामः ।
येनैषा चन्द्रिकाऽपि त्रिभुवनविशदा सत्पथोदञ्चितश्री-
र्लेभे सर्वज्ञमौलिप्रकटितविभवा त्वत्त एव प्रकाशम् ॥ १८ ॥

धीरक्षीराघवेन्द्र त्वदतुलरसनारङ्गनृत्यत्स्वयम्भू-
योषाधम्मिल्लभारस्रथकुसुमततीस्त्वद्गिरस्सङ्गिरामः ।
याभिः संमिश्रिताभिर्निरवधिवसुधा विश्रुता सा सुधाऽपि
क्षोणीगीर्वाणगम्यं परिमळमतुलं साम्प्रतं सम्प्रपेदे ॥ १९ ।

प्रायः प्रागन्यदीयातनुतरविवृतिग्रन्थवासोविहीना
ह्रीणा नादर्शि धीरैरपि किल युवतिर्भाष्यटीकाभिधाना ।
अद्य श्रीराघवेन्द्रव्रतिकृतविवृतिप्रौढकौशेयवासः

स्वाभिप्रेतं वसाना विहरति सुधियामग्रतः स्वैरिणीव ॥ २०॥

ग्रन्थोऽयं न्यायमुक्तावलिरिति भवता राघवेन्द्र प्रणीतो
नूनं मुक्तावळिर्यत्प्रथममुपचितादुद्धृतस्तन्त्रसिन्धोः ।
प्रोतश्च ज्ञानतन्तौ तदनु तव गुणप्रौढिमाशंसतान्नः
कण्ठेषु प्रेमभूम्ना बहुमतिविधये वाऽधुना सन्न्यधायि ॥ २१॥

हन्तानन्तोऽणुभाष्ये विलसति भगवत्पादसंवर्णितोऽर्थः
सत्यं प्रत्येतु लोकः कथमिदमधुना तस्य टीकां विना ते ।
धीरश्रीराघवेन्द्रव्रतिवर निवसद्विश्वमास्यान्तराले
स्तोके तोकस्य शौरेरतिभृशकुपितां तत्प्रसूमन्तरेव ॥ २२॥

भिनैरर्थैरनेकप्रकरणभणितैरद्य मध्वागमाब्धौ
मत्या भूयौ विचिन्त्य श्रुतिपरिणतया शस्तया सङ्गृहीतैः ।
सूत्रेष्वेकैकशोऽपि व्रतिवर भवता योजितेषु प्रवाचां
मोदो यावन्न तादृक् तव पुनरितरै राघवेन्द्रैः प्रबन्धैः ॥ २३॥

धीरश्रीराघवेन्द्रव्रतिवरसुजनानुग्रहव्यग्रचित्तैः
आचार्यैः सङ्गृहीताः कतिचन मनवः सारभूताः श्रुतिभ्यः ।
तानेवोद्धृत्य भूयः श्रुतिषु निदधता शिष्यवर्गोपकृत्यै
लोके साधु व्यधायि श्रुतगुणभवताऽऽचार्यचर्यानुवृत्तिः ॥ २४॥

गीतामृत्यर्थधूतश्रितजनदुरितामिन्दुवंशप्रसूतौ
व्याचक्षाणे मुरद्विष्यभिजनमभजद् भद्रमिन्दोरनिद्रम् ।
धीर श्रीराघवेन्द्र त्वयि पुनरनघे हंसवंशोदिते तां
व्याकुर्वत्यद्य भव्यं कथमिव न भजेदाशु मित्रान्ववायः ॥ २५॥

न स्यादीशप्रसादो गुरुवरकरुणामन्तरेणेति रूढो
धीर श्रीराघवेन्द्र व्रतिवर सुदृढश्चेतसस्तेविपाकः ।
येन व्याख्याय गीतामपि गुरुचरणोदारतङ्काष्यटीका-
व्याख्या विख्यातविद्वन्मणिगणविनुताऽकारि भूयस्त्वयैव ॥ २६॥

नानातन्त्रप्रसङ्गत्रिभुवनविदितोदारसारस्वतोऽपि
प्रत्नानेकप्रबन्धप्रवचनरचनावित्ततत्कौशलोऽपि ।
शश्वद् व्याख्यातगीताकृतिरपि विबुधानुग्रहैकाग्रचित्तो
गीतातात्पर्यटीकाविवरणमकरोदद्भुतं राघवेन्द्रः ॥ २७॥

लक्ष्मीनारायणार्यस्तव तनयमणिः सत्सु सर्वेषु धन्यो
यस्मादृग्भाष्यटीकाऽतनुतरविवृतेरञ्जसा तत्कृतायाः ।
प्रेम्णा विद्वत्सु भूयः प्रचमभिलषन् राघवेन्द्र व्रतीन्द्र
प्रावोचस्त्वं प्रतीतव्रत निचयमृचामेव भाष्यानुरोधात् ॥ २८॥

हृद्यत्रय्यन्तविद्यामुखनिखिलकलातत्त्वबोधैकमूर्ते
धीर श्रीराघवेन्द्र व्रतिवर सकलान्येव सूक्तानि सम्यक् ।
व्याकुर्वन्तं भवन्तं व्यवसितमतयो हन्त निध्यासयन्तः
सर्वे भूयः स्मरन्ति व्रतसमितिमणेर्ब्रह्मसूत्रप्रणेतुः ॥ २९॥

यावद्वेदान्तखण्डप्रवचनकृतिनि प्रेमभूमा न तादृक्
सर्वाम्नायप्रवक्तर्यनुपमचरिते राघवेन्द्रव्रतीन्द्रे ।
इत्येतद्देहभाजामतिविशदरुचौ जागरूकेऽपि लोके
राकाचन्द्रे द्वितीयाशशिशकलनतिन्यायमेवानुरुन्धे ॥ ३०॥

हृद्या टीकाऽनवद्या परविवृतयजुःसामसम्बन्धिनी ते
मालिन्यक्षालनाम्भः स्वयमजनि हरेरुत्तराङ्गे च मूर्ध्नि ।
सैवर्चां राघवेन्द्र व्रतिसमितिमणेऽनन्यसम्पर्कभाजां
ओजिष्ठे दक्षिणाङ्गे मृगमदमिलितोदारपाटीरसारः ॥ ३१॥

नूनं वाक्यानुरोधि प्रकरणमखिलं नेयमित्युक्तमुच्चैः
प्राचां वाचंयमेन प्रकटितविभवानन्तवेदान्तवाचा ।
स्वामिन्नेतत्प्रतीयः कथमिव कवयो राघवेन्द्र व्रतीन्दो
येन त्वद्वाक्यजातं प्रकरणनिकरं तावदद्यानुरुन्धे ॥ ३२॥

विख्यातश्रीसुधीन्द्रव्रतिसुत भवता साधुगीते सुतर्के
सद्यः प्रत्यर्थिहृद्ये मुनिमणिरचिते ताण्डवे योजितार्थे ।
प्रत्याख्यातप्रकाशः समजनि भुवने हन्त चिन्तामणिस्त्वं
ब्रूहि श्रीराघवेन्द्रव्रतिविबुधमणे कस्त्वदन्यो वदान्यः ॥ ३३॥

प्रौढानेप्रबन्धप्रवचनरचनालब्धविस्त्रब्धकीर्ते-
स्ते किं न्यायामृतस्याविवरणविधिना राघवेन्द्रायशः स्यात् ।
यद्राज्यप्रच्यवेनाखिलभुवनपते राघवस्येव कीर्तिः
लब्धैव प्रत्युतालं गुरुचरणकृतामोदनिर्वाहजन्या ॥ ३४॥

वाचा सङ्क्षिप्तया यद्बहुचरितमुपावर्णयस्त्वं मुरारेः
किञ्च श्रीराघवेन्द्र व्रतिप रघुपतेस्तेन नो विस्मयेऽहम् ।

किं वा दुः साध्यमस्ति त्रिजगति महतामात्मनः पाणिपद्मे
पश्यामन्दो मरन्दः किलघटजनुषा चोलिराकारि सिन्धुः ॥ ३५ ॥

मन्त्रिश्रीनीलकण्ठाभिधमखिमणिना भट्टतन्त्रानुबन्धे
ग्रन्थे तावत्त्वदीये करिणि गुणविदाऽऽरोपितेऽभ्यर्हणाय ।
कीर्तिस्ते राघवेन्द्र व्रतिसुमतिमणे नू नमन्यूनवेगा
दिङ्नागानारुरुक्षुः स्वयमपि सहसाऽधावदष्टौ दिगन्तान् ॥ ३६ ॥

व्यासेन व्युप्तबीजः श्रुतिभुवि भगवत्पादलब्धाङ्कुरश्रीः
प्रत्नैरीषत्प्रभिन्नोऽजनि जयमुनिना सम्यगुद्भिन्नशाखः ।
मौनीशव्यासराजादुदितकिसलयः पुष्पितोऽयं जयीन्द्रा-
दद्य श्रीराघवेन्द्राद्विलसति फलितो मध्वसिद्धान्तशाखी ॥ ३७ ॥

माद्यद्दैतविद्यावह्निर्वनिर्वापणक्षमः ।
वादीन्द्रयतिराट् तेने भक्त्या गुरुगुणस्तवम् ॥

इति श्रीराघवेन्द्रार्योभयवंशाब्धिचन्द्रमाः
उपेन्द्रसूनुर्वादीन्द्रश्चक्रे गुरुगुणस्तवम्

इति श्रीवादीन्द्रतीर्थविरचितं श्रीगुरुगुणस्तवनम् ।

॥ भारतीरमणमुख्यप्राणान्तर्गत श्री कृष्णार्पणमस्तु॥